National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(56): 197-204
© 2024 NJHSR
www.sanskritarticle.com

**डा. निरञ्जनमिश्रः**
सहाचार्यः, वेदभाष्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डा. निरञ्जनमिश्रः**
सहाचार्यः, वेदभाष्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्

**डा. निरञ्जनमिश्रः**

**षड्भिरङ्गैरूपेताय विविधैरव्ययैरपि।**
**शाश्वताय नमस्कुर्मौ वेदाय च भवाय च।।**

विश्वऽस्मिन् विश्वे भारतीयसंस्कृतेः भारतीयज्ञानगङ्गायाः भारतीयसाहित्यस्य च वैशिष्ट्यं अद्वितीयम् अतिप्रशस्तं सर्वैर्वन्दनीयं सर्वातिशयञ्च वर्त्तते। यत्र भ्रातृत्ववादस्य पराकाष्ठा, नित्यसहावस्थानभावस्य गरीयसी रीतिः, अमन्दमन्दाकिन्याः विश्वबन्धुत्वभावनायाः समुल्लसिता धारा नित्यं प्रवाहमाना सती सर्वानाश्चर्ययति। अत्र भारतभूमिं मातृरिव अभ्यर्चयन्ति जनाः। प्रकृतौ भगवतः शास्वतं रूपमनुभन्ति साधकाः। मातापितरौ साक्षाद्देवत्वेन आमनन्ति अत्र देशे समुद्भूताः सर्वेऽपि मानवाः। अस्यामेव भूमौ रामायणं महाभारतञ्च समनुष्ठितम्। विविधाः तपस्विनः महर्षयः सिद्धर्षयश्च अत्र जनिं प्रासुं समुत्सुकाः भवन्ति। अत्रैव हिमालयप्रभृतयः पर्वताः पृथिव्याः पुत्रिव शोभन्ते। अत्रत्याः प्रवाहमानाः गङ्गादिनद्याः ससागरधारां स्वपुण्यप्रवाहेन पवित्रयन्ति। अतः धन्याः वयं धन्यः अस्माकं भारतदेशः, धन्याः इयं स्वर्णगर्भा भूमि। अत्र सर्वं संस्कृतमयं संस्कारितञ्च विलसति। महर्षिणां दृष्टिः संस्कृता, अत्रत्या वाणी विश्ववारा, अत्रत्यं चिन्तनं विश्वकल्याणमयम्। अत्रत्या भावना द्यौः शान्तिरन्तरिक्षं शान्ति पृथिवी शान्तीति। अत्रत्यं धेयं **यत्र विश्वं भवत्येकनीडम्, सर्वे भवन्तु सुखिनः, वयं सर्वे अमृतस्य पुत्राः** इति। अतः एतादृशस्य सुमहद्देशस्य या प्रतिष्ठा विद्यते तस्याः नैपथ्ये सन्ति बहूनि कारणानि। तेषु प्रथममायाति विश्वस्य आद्यः ग्रन्थः आध्यात्मिकविज्ञानेतिहासदर्शनपरिपूर्णः वेदः एव। यः परात्परम्ब्रह्मणः निस्वासप्रस्वासरूपो भवति। स च एकैव वेदः ज्ञानकर्मोपासनाब्रह्मभेदेन ऋग्यजुसामाथर्वेति चतुर्धा विभक्तः। तत्रापि चतुर्विधपुरुषार्थस्य चतुराश्रमाणां चतुर्वर्गस्य प्रतीकभूताः भवन्ति इमे वेदाः। तेषु यजुर्वेदः कर्मप्रधानः भवति। कर्मशब्देन अत्र यागः इति ध्वन्यते। प्राधान्येन विविधप्रकारकाः यागाः वेदेऽस्मिन् आम्नाताः। भाष्योपक्रमे एव निगदितमस्ति यत् –

तस्मिन् च वेदे द्वौ काण्डौ। कर्मकाण्डो ब्रह्मकाण्डश्चेति। बृहदारण्यकाख्यो ग्रन्थो ब्रह्मकाण्डस्तद्व्यतिरिक्तं शतपथब्राह्मणं संहिताश्चेत्यनयोर्ग्रन्थयोः कर्मकाण्डत्वम्। तत्रोभयत्र अधानाग्निहोत्रदर्शपूर्णमासादिकर्मण एव प्रतिपाद्यत्वात्। बृहदारण्यके तु तृतीयाद्यध्यायेषु ब्रह्म प्रतिपाद्यते। अतः कर्मब्रह्मणि वेदस्य विषयः। तदवबोधः प्रयोजनम्। बोधार्थी चाधिकारी। तत्र प्रयोजनं विषयेण जन्यते। तयोर्जन्यजनकभावः सम्बन्धः। प्रयोजनाधिकारिणोरर्थ्यमानार्थित्त्वं सम्बन्धः। अधिकारिविषययोस्तु प्रयोजनद्वारेणोपकार्योपकारकत्वसम्बन्धः।

तस्मिञ्च वेदे कर्मकाण्डः प्रथममाम्नातः। यद्यपि ब्रह्मणोऽभ्यर्हितत्वात् ब्रह्मकाण्डस्यैव प्राथम्यमुचितम्। तथापि कर्मभिः साध्यां चित्तसुद्धिमन्तरेण पुरुषस्य ब्रह्मकाण्डेऽधिकाराभावात् अधिकारहेतुकर्मप्रतिपादकः काण्डः प्रथममाम्नातः। कर्माणि चतुर्विधानि। नित्यं नैमित्तिकं काम्यं निषिद्धञ्चेति। तत्र नित्यनैमित्तिकयोरननुष्ठानान्निषिद्धसेवनाच्च प्रत्यवाय उत्पद्यते। तथा च याज्ञवल्क्यः स्मरति -

**विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्॥**
**अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति॥**[1]

तेन च प्रत्यवायेन बुद्धिमान्द्ये सति नित्यानित्यवस्तुविवेकवैराग्यादीनामनुदयात् ब्रह्मविविदिषा पुरुषस्य न जायते। तस्माद्विविदिषाहेतुत्वं नित्यनैमित्तिककर्मणां बृहदारण्यके समामनन्ति – **तमेतं**

**वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन**[2] इति। तदनुष्ठानेन तमोगुणरूपे चित्तमालिन्ये अपगते सति सत्वगुणरूपस्य नैर्मल्यस्योदयात् विवेकवैराग्यादिसंपत्तौ सत्यां परमपुरूषार्थरुपे ब्रह्मत्ववेदनेऽभिरूचिर्जायते। **कारीर्या वृष्टिकामो यजेत**[3]**, चित्रया यजेत पशुकामः**[4] इत्यादीनि तु काम्यकर्माणि परमपुरूषार्थसाधनत्वाभावेऽपि स्वाभाविककामग्रस्तानां पुरूषाणां वैदिकमार्गे फलसंवादेन श्रद्धामुत्पादयितुमेवाम्नायन्ते। तस्मात् तानि वेदे प्रासङ्गिकानि। परमतात्पर्यं तु वेदस्य नित्यकर्मस्वेव।

तस्यैव यागस्य महत्त्वं विन्दुशःसमालोच्य तस्य श्रेष्ठताविषये दिङ्मात्रमालोच्यतेऽत्र –

- साधनपञ्चके शङ्कराचार्यपादैः-वेदो नित्यमधीतां तदुदितं कर्म स्वनुष्ठियताम्।
- महाभाष्यानुसारम् - ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ध्येयो ज्ञेयश्च। अत्र ज्ञेयपदेन यज्ञानुष्ठानमेव बोध्यते।
- जायमानो वै ब्राह्मणः त्रिभिः ऋणैः ऋणवान् जायते। ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्यः[5]।
- वाधूलस्मृतौ –

  **श्रुतिस्मृति मनैवाज्ञे यस्ते उल्लङ्घ्य वर्तते।**
  **आज्ञाच्छेदो ममद्वेषः मद्भक्तोऽपि न वैष्णवः।**
- क्रतुमयोऽयं पुरूषः – स यत्क्रतुर्भवति तत्कर्मकुरुते तदभिसम्पद्यते।
- विवेकचूडामणौ शङ्कराचार्यपादैः –

  **जन्तुनां नरजन्मदुर्लभमतो पुंस्त्वं ततो विप्रता।**
  **तस्मात् वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात् परम्।।**
- पूर्वमीमांसाशास्त्रे – वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः, स च धर्मः यागादिः।
- इष्टप्राप्त्युपायबोधकः धर्मः – यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत। अनिष्टोपायबोधकः अधर्मः
- उपनिषत्सु अपि **सत्यं वद, धर्मं चर** इति लिखितम्। स च धर्मः त्रिविधः – यज्ञोदानं तपश्चैव पावनानि मनीषिणाम्[6]।
- नारायणोपनिषदि – यज्ञो हि देवाः, तस्मात् यज्ञे रमन्ते यज्ञे सर्वं प्रतिष्ठितम्। तस्मात् यज्ञं परमं वदन्ति।

**यागशब्दनिर्वचनम् –**

- देवपूजासंगतिकरणदानेषु यज् धातोः यजयाचयतविच्छप्रच्छर-क्षोनङ् इति सूत्रेण घञ् प्रत्यये यागः इति सिध्यति। यज् घञ् यागः, यज्क्तिन् इष्टि।
- यज्ञेन यज्ञमयजन्तदेवाः, अयं यज्ञो भुवनस्य नाभिः, यज्ञो वै श्रेष्ठतमं कर्म, आयुर्यज्ञाय धत्तं, तं यज्ञं वर्हिषि प्रोक्षन्.... प्रभृतिभिर्वाक्यैः यज्ञस्य महत्त्वं प्रतिपादितमस्ति।
- कात्यायनः - यज्ञं व्याख्यास्यामः द्रव्यं देवतात्यागः, दधिसोमव्री-हियवादिद्रव्याणां अग्नीन्द्रादि तत्तत् दैवतमुद्दिश्य स्व स्वत्व-निवृत्तिपूर्वकं त्यागः अग्नौ प्रक्षेपो वा यज्ञः।

**यागभेदः**

ऐतरेयब्राह्मणे – स एषो यज्ञः पञ्चविधः – अग्निहोत्रं, दर्शपूर्णमासौ, चातुर्मास्यानि, पशु, सोमः इति।

गौतममतानुसारेण – यागाः एकविंशविधाः भवन्ति।

**सप्तपाकसंस्थाः** - औपासनाहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, मासिश्राद्धम्, श्रवणा, शूलगवरिति।

**सप्तहविर्संस्थाः**– अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्ध, सौत्रामणी, पिण्डपितृयज्ञः।

**सप्तसोमसंस्थाः** – अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्यामरिति।

सप्तपाकसंस्थाः स्मार्त्तयागेष्वन्तर्भवन्ति। इमाः संस्थाः स्मार्ताग्निना पुरूषेण स्वाग्नौवनुष्ठेयाः। स्मार्ताग्नि आधानम् **आवसथ्याधानं दारकाले, दायाद्यकाल एकेषाम्**[7] इति नियमेन सम्पद्यते। **भार्यादिरग्निर्दायादिर्वा**[8] इतिवचनाद् स्मार्ताग्निः विवाहप्रभृति दायप्रभृतिर्वा संपादनीयो भवति। वैवाहिकचतुर्थीहोमानन्तरम् आवसथ्याधानदारकाले इति नियमेन सम्पादितोग्निः स्मार्ताग्निः इत्युच्यते। अस्मिन्नेव सप्तपाकसंस्थाः अनुष्ठेयाः भवन्ति।

श्रौतस्मार्तभेदेन यज्ञो द्विविध इति वक्तुं शक्यते। उभयोरनुष्ठानार्थम् अग्न्याधानस्य आवश्यकता वर्तते। सविधि अग्न्याधानानन्तरमेव तदुत्तरक्रतुषु यज्ञेषु वाधिकारः सिद्ध्यति।

अग्न्याधानं द्विविधं श्रौताधानम्, स्मार्ताधानञ्चेति। श्रौताधानात् पूर्वं स्मार्ताग्निराधानं कर्तव्यं भवति। स्मार्ताग्निराधानादनन्तरमेव श्रौताग्नेराधानं कर्तुं शक्यते। यः गर्भाधानादारभ्य विवाहपर्यन्तं विहितसंस्कारेषु संस्कारितः त्रैवर्णिकः सपत्नीकश्च स एव आधानकर्मणि अधिकारी भवति। कात्ययनाचार्यस्तु रथकारस्या-धानमात्रे एव अधिकार इति प्रतिपादयति। आपस्तम्बचार्योऽपि मतमिदं समर्थयति।

**स्मार्ताग्न्याधानम् –**

उपनयनसंस्कारेण संस्कारितः त्रैवर्णिकःविधिवत् वेदमधीत्य गुरोरनुज्ञामवाप्य समावर्तनसंस्कारेण संस्कारितः सन् स एव स्नातकः शास्त्रोक्तलक्षणयुक्तां सुशीलां सवर्णां कन्यामुद्वा गृहस्थाश्रमे प्रविशति। तस्य सपत्नीकस्यैव अग्न्याधाने अधिकारः, अन्येषां न। स्मार्ताग्न्याधानस्य मुख्यकालो भवति विवाहकाल एव। अन्ये केचनदायविभागकाल इति मन्यन्ते। वैवाहिकहोमः चतुर्थोहोमो वा यस्मिन्नग्नौ सम्पाद्यते, तमग्निं परिगृह्य गृहे यथाविधि सम्पादितोऽग्निः गृह्याग्निः स्मार्ताग्निर्वेति पदेन उच्यते। तदेव सम्पादनमग्न्या-धानमित्युच्यते। पक्षान्तरे यदि केनचित्कारणेन तदा न गृहीतं, तर्हि दायविभाजनकालेऽपि तेनैव विधिना अग्न्याधानं कर्तुं शक्यते। अन्यथा उभयोरशक्ते पितुर्गृहीताग्निकत्वे पुत्रः तस्मात् ग्रहीतुं समर्थो भवेत्। अनेन स्मार्ताग्न्याधानविधिना सम्पादिताग्नौ सर्वाणि गृह्यसूत्रोक्तकर्माणि,पञ्च महायज्ञाः,सप्तपाकसंस्ताश्च अनुष्ठीयन्ते।

**श्रौताग्न्याधानम् –**

स्मार्ताग्न्याधानान्तरं श्रौतकर्मणामनुष्ठानार्थं समुचितकालेश्रौताग्नेराधानं कर्तव्यं भवति। आधानशब्दस्यायमर्थो यत् श्रुत्युक्तविधिना वेदिकाया उपरि अग्न्याधारभूतकुण्डान् निर्मीय तत्र तत्र सम्भारान् आरोप्य यथाविधि अग्नेः संस्थापनमिति भवति। आधानेनानेन च श्रौताग्नीनां सिद्धिर्भवति। इदं चाधानं त्रिविधम् - १. होमपूर्वाधानम् २. इष्टिपूर्वाधानम् ३. सोमपूर्वाधानमिति।[9] अग्निहोत्रानुष्ठानात् पूर्वं यदाधानं क्रियते तत् होमपूर्वाधानाम्, दर्शपूर्णमासात् पूर्वं यदाधानं क्रियतेतत् सोमपूर्वाधानमित्युच्यते। अग्न्याधानस्य कालविषये शास्त्रान्तरेषु नैकानि मतान्युपलभ्यन्ते। आपस्तम्बश्रौतसूत्रे अमावास्यायां पौर्णमास्यां वा अग्न्याधेयमिति विधीयते।[10] शतपथश्रुतावपि अग्न्याधानस्य कालविषये इत्थमुच्यते यत् - वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यो, शरदि वैश्यः[11] इति। तत्रैव अमावास्यायामग्न्याधानं कर्तव्यमित्यपिसंदृश्यते।[12] कात्यायनेनापि मतमिदं समर्थितम्।[13] शाङ्खायनाचार्यः पौर्णमास्याममावस्यायां वा अग्नयाधेयमिति मनुते।[14]

अग्न्याधानस्य वैकल्पिककालत्वेन कृत्तिका-रोहिणी-नक्षत्रयुक्तचन्द्रमा भवतीति सूत्रितम्। कात्यायनाचार्यः मतमिदं समर्थयन् कृत्तिका-रोहिणीव्यतिरिक्तयोः मृगशिराः-फाल्गुन्योः वा कस्मिन्नपि एकस्मिन्नक्षेत्रे अग्न्याधानं कर्तव्यमिति प्रतिपादितवान्। कामानामुद्दिश्य अग्न्याधानकालस्य विधानं श्रौतसूत्रग्रन्थेषु दरीदृश्यते।

**औपासनाहोमः –**

**दध्ना तण्डुलैरक्षतैर्वा** इति वचनाद् द्रव्यहस्तेन क्रियमाणहोमः औपासनाहोम इत्युच्यते। कालद्वयानुष्ठेयमिदम्। सायम् – अग्निः प्रजापतिदेवते, प्रातः - सूर्यः प्रजापतिरदेवते, अयं होमः जीवता सपत्नीकेन पुरुषेण यावज्जीवमनुष्ठेयः।

**वैश्वदेवम् -**

पाकयज्ञेषु द्वीतियमिदं वैश्वदेवम्। विश्वे सर्वे देवाः अत्रेज्यन्त इति हेतुरिदं कर्म वैश्वदेवम्। अस्य नामान्तरं पञ्चमहायज्ञाश्चेति (देवयज्ञः, भूतयज्ञः, पितृयज्ञः, मनुष्ययज्ञः, ब्रह्मयज्ञः)।

गृहमेधिनः इदं नित्यम्। मनुना उक्तम् –

**पञ्च सूना गृहस्थस्य चूल्ली पेषण्युपस्करः।**
**कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्।**
**तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।**
**पंच क्लृप्ता महायज्ञाः प्रत्यहं गुहमेधिनाम्।।**
**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।**
**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।**[15]

**पार्वणम् –**

इदं पार्वणम् षड् पुरूषोद्देश्यकं भवति। प्रत्यमायां कर्तव्यं कर्म, इदमपि नित्यम्।

**अष्टकाश्राद्धम् –**

**उर्ध्वमाग्रहायण्यातिस्रोऽष्टकाः**[16]। इति सूत्रवलेन हेमन्तशिशिरसम्बन्धिनीषु चतसृषु कृष्णपक्षाष्टमीषु अपूपगोमांसशकैः – इन्द्रविश्वदेवप्रजापतिपितृन् उद्दिश्य क्रियमाणं कर्म। अत्र गोमासंस्य द्रव्यत्त्वेन विधानात् कलौ गवालम्भनस्य निषेधत्त्वात् तदिदानीं नानुष्ठीयते।

**मासिश्राद्धम् –**

**मासि मासि वोऽशन्** इति शतपथ उक्तेः कारणात् मासि मासि क्रियमाणमिदं कर्म।

**श्रवणाकर्म -**

श्रावणपौर्णमास्यामारभ्य मार्गशीर्ष्याः प्रतिदिनं सायं सर्पेभ्यो अर्थे क्रियमाणं वलीकर्म श्रावणाकर्म उच्यते। इदं च सकृत् कार्यम्। कालसंयोगाभावत्।

**शूलगवः –**

इदं गोद्रव्यककर्मविशेषः। सत्यपि कलौ निषिद्धम्। शाखान्तरीयाणाम् इशानाय स्थालीपाकं श्रपयित्वा इति गोस्थाने स्थालीपाकविधानादनुष्ठानम्। इदमपि सकृत् भवति।

**श्रौताः सप्तहविर्यज्ञसंस्थाः –**

एतासु संस्थासु तथा सप्तसोमसंस्थासु गृहीत श्रौताग्नेः एव सपत्नीकस्य अधिकारः भवति। जातपुत्रः कृष्णकोशोऽग्निनादधीतः इति श्रुत्या पञ्चविंशतेः उपरि चत्वारिंशित् वर्षेभ्यः पूर्वं सपत्नीकेन पुरूषेण अनुष्ठेयं भवति। वसन्ते ब्राह्मणोऽग्निनादधीतः ग्रीष्मे राजन्यः, वर्षासु वैश्यःप्रभृतिभिः वाक्यैः त्रैवर्णिकेन **अमावस्यामग्न्याधेयम्** इति वाक्यं पुरस्कृत्य तत्तत् काले अग्न्याधानं कर्तव्यं भवति।

**सप्तहविःसंस्थाः**-अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्ध, सौत्रामणिः, पिण्डपितृयज्ञश्चेति।

**अग्निहोत्रम् –**

अग्निहोत्रं नाम अग्न्युद्देशेन सायं प्रातः क्रियमाणो होमविशेषः। इदं कर्म आधानाग्नौ एव अनुष्ठेयम्। अत्र अग्निः देवता। सायं काले प्रजापति स्विष्टकृत्स्थानीया अङ्गदेवता, प्रातः च सूर्यदेवता मुख्या। प्रजापतिः अङ्गदेवता। अग्निदेवताकप्रवृतिनिमित्तमादाय अग्निहोत्रशब्दः कर्मनामधेयम्। अस्य महत्प्राशास्त्यमस्ति। नित्यत्त्वात् अकरणे महान् प्रत्यवायो जायते। उत्तरक्रतूणां दर्शपूर्णमासादीनां यथावत् अनुष्ठानंसौकर्याभावेऽपि एतस्य अवश्यं अनुष्ठानं कर्तव्यम्। सर्वं अनेन सिद्ध्यति।

**दर्शपूर्णमासयागः –**

अमायां पूर्णिमायां चानुष्ठेयत्त्वादेव अनयोः कर्मणोः दर्शपूर्णमासौ इति संज्ञा। **पौर्णमास्याम्** आग्नेय अष्टकपालपुरोडाशयागः, अग्निषोमीय उपांशुयागः, अग्निषोमीय एकादशकपालपुरोडाशयागः। **दर्शे –** आग्नेयः पुरोडाशयागः, इन्द्रदेवताक दधिद्रव्यको यागः, इन्द्रदेवताक पयोद्रव्यको यागः। उभयत्र मिलित्वा षड् यागाः।

पौर्णमासानुष्ठानमादौ एव। अत्र चत्वारो ऋत्विजः। इयं तु सर्वासामिष्टिनां प्रकृतिः भवति। (इष्टिसु दर्शपूर्णमासयोः प्रवृतिः स्यात्)। यत्र समग्राङ्गोपदेशः सा प्रकृतिः। यत्र चान्यतोऽङ्गप्राप्तिः सा विकृति। श्रुतौ तु सहस्रं हि इष्टयः विहिताः, तत्रापेक्षितान्यङ्गानि न पठितानि, इमाम् एव सर्वान् अङ्गकलापानभिधाय तत एव तासु तासु इष्टिसु अतिदेशः कर्तव्यः।इमौ यावज्जीवमनुष्ठेयौ, तावत् कर्तुमशक्यश्चेत् त्रिंशत् वर्षाणि कृत्वा विरमेत्।

**आग्रयणम् –**

नवान्नेऽष्टिः इति नामान्तरम्।इदं नित्यं करणीयम्। अग्रे नवान्नोत्पत्त्यनन्तरमयनमावरणं यस्य तदाग्रयणम्। इदं शरदि वसन्ते च भवति। इन्द्राग्निभ्यां पुरोडाशः। द्यावापृथिवीभ्यां यवमयश्चरूः। नवव्रीहयः यवप्रभृतीनिद्रव्याणि। अनया इष्ट्या आहिताग्निः नवान्नमश्नीपात्।

**चातुर्मास्ययागः –** वैश्वदेवम्, वरूणप्रघासः, साकमेधः, शूनाशीरीयम्।

**वैश्वदेवम् -**

चतुर्षु मासेषु अनुष्ठेयत्त्वात् चातुर्मास्यमिति संज्ञा। प्रथमं फाल्गुनपूर्णिमायां। ततः चतुर्षु मासेषु गतेषु आषाढपूर्णिमायां द्वितीयं पर्व। ततः कार्तिक्यां तृतीयं पर्व। ततः फाल्गुनशुक्लप्रतिपदि एवं आवर्तयितव्यम्। विश्वेदेवा अपश्यन् यत् पर्व तत् वैश्वदेवं पर्व। अत्र अष्टौ हविंषी भवन्ति।

आग्नेयाष्टकपालपुरोडाशयागः, सौम्यश्चरूः, सावित्रो अष्टकपाल द्वादशकपालोवा पुरोडाशः, सारस्वतश्चरूः, पौष्णः पैष्टश्चरूः, मरूद्भ्यः सप्तकपालपुरोडाशः, द्यावापृथिवी एककपालपुरोडाश (इत्यष्टौ)। इमे दर्शपूर्णमासविकृतिभूताः। तत्र तावत् नवप्रयाजानुयाजाः, त्रीणि समिष्टयजूंषी, वाजीदेवताको वाजीनयागश्चेति विशेषाः।

( अस्येव धर्माः उतरत्र प्रवर्तन्ते)

**वरूणप्रघासः –**

प्रकृष्टो घासो भक्षणविशेषो येषु हविर्विशिष्टेषु ते प्रघासाः। वरूणमुद्दिश्य प्रघासा वरूणस्य पाशरूपं कर्म घ्नन्तीति वा वरूणप्रघासाः।

अत्र वैश्वदेवपर्वणः आदितः पञ्चहवींषि, अनुष्ठेयानि अधिकानि चत्वारि, ऐन्द्राग्नो द्वादशकपालः वारूण्यामिक्षा, मारूत्वामिक्षा, काय एककपाल इति। अत्र **कः** शब्दः अकारन्तो ब्रह्मवाची ब्रह्मदेवताक इति अर्थः। विशेषेण अत्र वेदीद्वयं भवति। प्रतिप्रस्थाता अत्र अधिकारी भवति। यवपिष्टनिर्मितानि करम्भपात्राणि भवन्ति, तैः होमः अत्र विशेषः।

**साकमेधः –**

साकमेधः कार्तिक्यां भवति। साकमेधन्ते वर्धन्ते देवताः एभिर्हविर्विशेषैरिति साकमेधः। पूर्वेद्युः प्रातः अनीकवतीष्टिः। तत्र अग्निरनीकवान् देवता। अष्टकपालपुरोडाशद्रव्यम्। अन्वाहार्यो दक्षिणा। मध्याह्ने शान्तपनेष्टिः। तत्र शान्तपना मरूतो देवता, चरूर्द्रव्यम्, अन्वाहार्यो दक्षिणा। सायं गृहमेधीयेष्टिः। तत्र गृहमेधिनो मरूतो देवता। पयसि पक्वचरूर्द्रव्यम्। ऋषभो दक्षिणा। ततः प्रातः दर्विहोमं सम्पाद्य क्रीडनीयेष्टिः। तत्र मरूतो क्रीडिनो देवता। पूरोडाशः द्रव्यम्। ततो अदितीष्टिः। अदितिदेवताकश्चरूः। चरूर्द्रव्यम्। अन्वाहार्यो दक्षिणा। ततः महाहविस्संज्ञकेष्टिः। अत्रैव वैश्वदेवस्य पञ्चहवींषि भवन्ति। पुनः इन्द्राग्नौ द्वादशकपालं माहेन्द्रश्चरूः, वैश्वकर्मणः एककपालः। ततः पित्रेष्टिः। ततः त्र्यम्बकेष्टिः।

**शुनासीरीयः –**

शुनो वायुः सीर आदित्यः। ते देवते अस्येति शुनासीरं पर्व। अत्र पौर्णमासधर्माः भवन्ति। वैश्वदेवोक्तानि पञ्चहवींषि, पुनः शुनासीरीयाभ्यां द्वादशकपालः, वायव्यं पयः, सौर्यं एककपालम्।

चातुर्मास्ये – उत्सर्गः, यावज्जीवमिति पक्षद्वयं, सकृत् चातुर्मास्यमिष्ट्वा ततः पशुसोमादीना यो भवति स उत्सर्गपक्षः, प्रतिवर्षं यः यजति स यावज्जीवपक्षः। उत्सर्गे फाल्गुणशुक्लप्रतिपदि शुनासीरीयः ततः पौर्णमास्यां अग्निष्टोमः, यावज्जीवपक्षे फाल्गुनशुक्लप्रतिपदि शुनासीरीयमिष्ट्वा पूर्णिमायां वैश्वदेवपर्वः। ऐहिक-पाशुक-सौमिकभेदेनापि चातुर्मास्यानि त्रिविधानि।

**निरूढपशुबन्धः –**

एतत् प्रतिसंवत्सरं वर्षर्तौ कार्यः। अत्र देवता इन्द्राग्नी, सूर्यः, प्रजापतिर्वा। द्रव्यं छागः। अयं अग्नीषोमीयप्रकृतिकः।

**सौत्रामणी –**

अयं पशुयागः, स्वतन्त्रोऽङ्गभूतश्चेति द्विविधः। अग्निचयनस्य अङ्गभूतः, नित्यः, काम्यः नैमित्तीकश्च राजसूयस्यापि। देवता – अश्विनौ, सरस्वती, इन्द्रश्च। इन्द्र सूत्रामा देवता। त्रयः पशवः – अजः, मेषः, वृषभः। दिनचतुष्टयानुष्ठेयो क्रतुः। त्रयो पयोग्रहाः। त्रयो सुराग्रहाः।

- **सोमयागः –**

**सप्तसोमसंस्थाः –**

अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्यामश्चेति। सोमनामलताविशेषः। तं कस्माच्चित् पुरूषात् क्रीत्वा ततो रसं निष्काष्य तेन रसेन च होमः क्रियते अयमेव सोमयागः। इदानीं सोमस्य अनुपलब्धात् तत्स्थाने पूतीकासंज्ञकं लतान्तरं संगृह्य तेनैव यागः क्रियते। पञ्चभिर्दिनैः अनुष्ठीयते अयं यागः। षोडश ऋत्विजः यागेऽस्मिन् भवन्ति।

**यज्ञं व्याख्यास्यामः सः त्रिभिभेदैः** इत्यनेन यागस्यास्य प्रारम्भः। अग्निष्टोम इति साम्नः संज्ञा। **यज्ञा यज्ञा वो अग्नये** इति ऋचि गेयत्वेन विहितं साम अग्निष्टोम इत्युच्यते। एतत् अन्तिमं साम भवति। अनेनैव समाप्यमानत्वात् अयमेव क्रतुः अग्निष्टोमसंस्थाको अग्निष्टोमः। सोमयागे येन साम्ना समाप्ति तन्नाम्ना व्यवहारः। यथा -–

अग्निष्टोमसामानन्तरं यत्र उक्थनामक साम्ना स्तूयते सः उक्थसंज्ञक ज्योतिष्टोमः। ततः षोडशाख्यं स्तोत्रं क्रियते। अतः षोडशीसंस्थाको ज्योतिष्टोमः। ततः अतिरात्र संज्ञकानि सामानि गीयन्ते। एवं संख्या चतुष्टयविशिष्टस्य क्रतोः ज्योतिष्टोम इति संज्ञा। ज्योतिंषी स्तोमा यस्य स ज्योतिष्टोमः। अग्निष्टोमानन्तरं उक्थम् कृत्वा यत्र षोडशी क्रियते स अत्यग्निष्टोमसंज्ञकः क्रतुः। उत्थाप्यते सोमो अनेन इति उक्थ्यः, तत्र पञ्चदशस्त्रोत्राणि। षोडशी शस्त्राणि यस्मिन् क्रतौ सः क्रतुः षोडशीः। वाजपेयः -वाजोऽन्नं पेयद्रव्यात्मकं यस्मिन् स वाजपेयः, सुराग्रहणस्यात्र सम्भवात्तदाप्ति हेतुत्वाच्च वाजपेयः। तत्र सप्तदशदीक्षादिनानि त्रीण्युपसद्दिनानि एकं सुत्यादिनमित्योकविंशति दिनसाध्यत्वमिति प्रचीनसम्प्रदायसिद्धः पक्षः। आधुनिकैसु अष्टभिदिवसैः संस्थियते।अतिरात्रः – चतुर्भिः अग्निष्टोमोक्थ्यषोडश-रात्रपर्यायसन्धिसज्ञकैः स्तोत्रैः संस्थितश्चतुष्टोमोपेतो ज्योतिष्टोमः अतिरात्र उच्यते। अतिरात्रशब्देन सर्वत्र रात्रिपर्यायसन्धि-स्तोत्राश्विनशस्त्राणीति समुदायो अवगन्तव्यः। अतिरात्र अहीनेषु आदितः अन्ततो वा भवन्ति। अप्तोर्याम -अतिरात्रसंस्थावत् रात्रिस्तोत्राणि सन्धिस्तोत्रं च यथावदनुष्ठाय तदनन्दरं चत्वारि स्तोत्राणि अधिकतया यत्रानुष्ठीयते सा अप्तोर्यामसंस्था। अप्तोर्यामशब्दव्युत्पत्तिः श्रुतावेवं वर्णिता – पुरा कदाचित् प्रजापतिः पशूनसृजत्। सृष्टास्ते ततोऽपगताः। ताननेन क्रतुना आप्नोत्। यस्मादाप्नोत् तस्मादप्तोर्यामत्वमिति। अप्तोः प्राप्तः यामो यज्ञः अप्तोर्याम इति।

एतेषु यावन्तो ग्रहाः तावन्ति एव स्तोत्राणि। तावन्ति एव शस्त्राणि।प्रथमदिने – स्त्रोत्रशस्त्रादीनां, दीक्षा, द्वीतियदिने – प्रायणीयेष्टि, सोमक्रयः, तृतीयदिने- उपसद्, चतुर्थदिने – अग्नीषोमीयपशुः, पञ्चमदिने – सुत्यादिनम् – सोमः अभिषूयन्ते। एतदतिरिच्य यागवाङ्मये राजसूयः, अश्वमेधः, पुरूषमेधः, सर्वमेधः, पितृमेधप्रभृतयः बहवः यागाः वर्तन्ते। तेषां स्वरूपवर्णनंयथा –

सोमोनाम लता विशेषः, तां लतां सोमविक्रयिणस्सकासात् यथाविधि क्रीत्वा तस्यैव अभिषवणादिना रसं निष्कास्य तं रसं मुख्यहविस्त्वेन व्यवहृत्य यो यागः सम्पाद्यते स सोमयागः। प्रामुख्येन सप्त मोमसंस्थाः भवन्ति। ते यथा –अग्निष्टोम-अत्यग्निष्टोम-उक्थ्य-षोडशी-वाजपेय-अतिरात्र-अप्तोर्यामश्च। **यज्ञं व्याख्यास्यामः**[17] इत्यनेन सूत्रेण आपस्तम्बाचार्यः यज्ञस्यव्याख्यानम् इत एव कृतवान्। स त्रिभिर्वेदैर्विधियते[18] इति वचनात् स्पष्टं भवति यत् यस्यानुष्ठानं विधानं वा वेदत्रयोक्तमन्त्रैः सम्पाद्यते स एव यज्ञो भवति। अस्यैव सोमयागे वेदत्रयसम्बन्धः। न ततः पूर्वक्रियमाणाग्निहोत्रादीनाम्।

**सोमयागानुष्ठानकालः, तत्राधिकारी च-**

सोमयागं चिकीर्षमाणो यजमानः समुचितकाले आधानोक्तविधिना अग्निनाधाय अग्निहोत्रं दर्शपौर्णमासञ्च इष्ट्वा ततः सोमयागमनुतिष्ठेत् इत्येकः पक्षः।[19] पक्षान्तरे तु सोमयागार्थमपेक्षितदक्षिणान्नघृत-सोमादिकं सम्पाद्य आधानात् परं सोमः कर्तव्यः।[20] सोमार्थसाधनपक्षे कालविशेषस्यापेक्षा न भवति, कस्मिंश्चित् पुण्यतिथौ अग्निन् आधायसोमोऽनुष्ठातुं शक्यते।[21]

**दौर्बाह्मण्यदोषपरिहारः -**

यस्य यजमानस्य पित्रा पितामहेन वा सोमयागो नकृतः सः दुर्ब्राह्मणः।[22] तेन दौर्बाह्मण्यदोषपरिहारार्थं पुनरुत्सृष्टं पशुमालभ्य ततः सोमयागः कर्तव्यः। यः पूर्व वाहकः सन् इन्द्रियसामर्थ्यक्षीणे सति वहनकार्यतः निवृतः स पुनरुत्सृष्टः। वहनं च पुंगव्येन सम्भवतीति स एवात्र ग्राह्यः। स च आरम्भात् पूर्वस्मिन्पर्वणि पुण्याहे वा कर्तव्यः। तत्रोद्धारणादि-कर्मापवर्गान्तं निरूढपशुवत्सर्वंभवतीति देवयाज्ञिक-पद्धत्यनुसारम्। कर्काचार्यमतानुसारं अग्निषोमीयपशुवद्भवति, बौधायानाचार्योऽपि मतिमिदंसमर्थयति।[23]

**तेन वसन्ते वसन्ते यजेत**[24]**, वसन्तेऽग्निष्टोमः**[25] इत्यादि सूत्रानुसारं यजमानः कात्यायनापस्तम्बयोर्मते वसन्तर्तौ ज्योतिष्टोमेन यजेत। अन्येषां नये तु दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत। ज्योतिष्टोमस्य चतस्रः संस्थाः। अग्निष्टोमः, षोडशी, उक्थ्यः, अतिरात्रश्चेति। अग्निष्टोमादिशब्दा मुख्यतया सामवाचकाः। सामवेदे **यज्ञयज्ञा वो अग्नये** इत्यादि गेयत्वेन विहितं साम अग्निष्टोमशब्देन उच्यते। अतोऽग्निष्टोमसाम्ना समाप्यमानत्वात् अस्य अग्निष्टोम इति संज्ञा। एवं त्रिवृत्-पञ्चदश-सप्तदश- एकविंशत्याख्याः चत्वारः सोमाः ज्योतिः पदेनाभिधीयन्ते, ज्योतींषि स्तोमा यस्य स ज्योतिष्टोमः। तथा चोक्तं ब्राह्मणे-

**त्रिवृत्पञ्चदशः सप्तदश एकविंश एतानि वाव।**
**तानि ज्योतींषि य एतस्य स्तोमाः।।**[26] **इति**

तथैव अग्निष्टोमसामानन्तरम् उक्थ्यसाम्ना समाप्यमानसंस्थायाः उक्थ्येति संज्ञा। एवमेव षोडश्यतिरात्रौ भवतः। एतेसामेव चतसृणां संस्थानां क्वचिदनुष्ठानभेदे अपरास्तिस्रः संस्थाः आपद्यन्ते अत्यग्निष्टोम-वाजपेय-अप्तोर्यामाश्चेति। अग्निष्टोमस्तोत्रसमनन्तरं यत्र उक्थ्यस्तोमं न प्रयुज्य, षोडशीस्तोमःप्रयुज्यते तत्रैव च परिसमाप्यते सा अत्यग्निष्टोमसंस्था। यथाऽवस्थितषोडश्युत्तरं तत्र वाजपेयसंज्ञकं स्तोत्रं पठ्यते सा वाजपेयसंस्था। अतिरात्रे त्रयो हविपर्यायाः भवन्ति, यत्रातिरात्रे चतुर्थीरात्रिपर्यायो वर्धते सा अप्तोर्यामसंस्था। इत्थं सप्तसंस्थाको ज्योतिष्टोमक्रतुः। क्रतुशब्दस्य प्रयोगः सोमयागे एव भवति, नान्यत्र।

अत्रैतेषां सोमक्रतूनां मध्ये कः प्रथमः इत्यस्मिन् विषये विद्वत्सु मतैक्यं न परिदृश्यते। विषयेऽस्मिन् पतञ्जलिना स्व प्रणीतनिदान-सूत्रग्रन्थे अनेकेषामाचार्याणां मतान्युद्धृतानि। तद्यथा - अथ का प्रथमा संस्थेति, अग्निष्टोमीं प्रथमां मन्ये इति शाण्डिल्यः। प्रथमं ह्येवं स्नानं भवति। अथापि प्रथममधीमहे। तां प्रथमां मन्ये इति गौतमः। अतिरात्रीं प्रथमां मन्ये धनञ्जयः। अथापि शधद्वहृवृटामतिरात्रीमेव

प्रथममधीयते।[27] भारद्वाजमते - **अतिरात्रमेक प्रथमं यज्ञं समामानन्ति**[28] **आपस्तम्बानुसारं अग्निष्टोमः प्रथमयज्ञः**[29] कात्यायनमतानुसारमपि अग्निष्टोमः प्रथमः।[30] अग्निष्टोमस्य उत्तरे अत्याग्निष्टोमादयः षट् क्रतवः भवन्ति। तथा च सूचितं कात्यायनेन -

**बहुत्तरेऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रअप्तोर्यामः**[31]

तत्र अग्निष्टोमसंस्थैव अत्यग्निष्टोमोक्थ्यषोडशस्यतिरात्रिणां चतसृणां प्रकृतिः। वाजपेयः षोडशविकारः। अप्तोर्यामस्तु अतिरात्रसंस्था-विकारः। आपस्तम्बाचार्याणां मते उक्थ्यादयः सोमक्रतवः जोतिष्टोमस्य (अग्निष्टोम) गुणविकाराः सन्ति, तन्मतानुसारम् उक्थ्येन पशुकामः षोडशीना वीर्यकामः, अतिरात्रेण प्रजाकामः, अप्तोर्यामेण सर्वकामाश्च यजेत।[32] परन्तु सत्याषाढ श्रौतसूत्रे **सर्वकामोऽग्निष्टोमः**[33] इति प्रतिपादितम्।

सोमयागानां विधानं एकाहप्रभृति महस्रसंवत्सरपर्यन्ता विहिताः। तत्र चत्वारः प्रकाराः एकाह-अहीन-सत्र-साद्यस्क्रश्चेति। एकाहनाम एकस्मिन्नहनि समाप्यमाणःसोमक्रतुः। द्विरात्रमारभ्यैकादशरात्र-पर्यन्ताः ऋतवोऽहीनाः भवन्ति। तथैव त्रयोदशरात्रप्रभृति सहस्रसंवत्सरपर्यन्तानि सत्राणि भवन्ति। रात्रिसत्राणी, अयनसत्राणीति सत्रस्यापि भेदद्वयं वर्तते। यस्मिन्सोमयागे सर्वाः क्रियाः सद्य एवानुष्ठेयाः, सः यागः साद्यस्क्र इत्युच्यते।[34] तत्र एकाह-अहीन- सत्र-साद्यस्क्रादीनामपि बहवः भेदाः श्रुतौ प्रतिपादिताः।

सूत्रग्रन्थानामाश्रित्य दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यष्टव्यमिति वक्तुं शक्यते।[35] तत्र कात्यायनादयः सूत्रकाराः सोमयागः वसन्तर्तौ अनुष्ठातव्यमिति स्वाभिमतं पोषयन्ति।[36] तत्र सर्वसोमयागानां प्रकृतिभूतः अग्निष्टोमः। सोमानुष्ठानपक्षे कालद्वयम्। प्रथमपक्षे कस्मिंश्चिद्वसन्ततौ अग्निमाधाय सङ्कल्प्य सोमोऽनुष्ठातुं शक्यते। पक्षान्तरे तु दर्शपूर्णमासाभ्यामिष्ट्वा ततः सोमेन यजेत।[37]

**सोमयागार्थसङ्कल्पः -**

यजमानः वसन्ते अमावास्यायां पौर्णमास्यां वा सुत्या यथा स्यात्तथोपक्रम्य अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणःपवित्रपाणिः पत्न्यासह सङ्कल्पं करोति।त्रिपुरुषसोमपीथ-विच्छेदनसन्धानार्थमैन्द्राग्रपशुम्, दौर्ब्राह्मण्यनिर्हणार्थमाश्विनपशुम्, अग्नीषोमीयेन पशुना सहालाभ्यौ कुर्वन् सोमेन यक्षोदिति। यत्र यत्र पशुशब्दः श्रुतः तत्र तत्र पशुरूपः पुरोडाशः ग्राह्यः।

तत्र एकादीक्षा पक्षे एकादश्यामुपक्रमः, तिस्रो दीक्षा इति पक्षे नवम्यामुपक्रमः। यजमानः प्रातरग्निहोत्रं हुत्वा अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ स्मृत्वा अमुकगोत्रामुकप्रवरान्वितोऽमुकशर्मा सपत्नीकोऽहं सोमेन मध्ये ज्योतिष्टमेनाग्निष्टोमेन रथन्तरज्योतिष्टोमादीना साम्ना हिरण्यवस्त्र-गोऽश्वादिदक्षिणेन सपवर्ग्येण परमेश्वरं प्रिणयामि इति संङ्कल्पानन्तरं यजमानः ऋत्विग्भ्यः सोमं निवेदयति इति कात्यायनः। तथोच्यते-

असौ सोमेन यजते सत्वामार्त्विज्यमभ्यर्थयेत्।अन्येषामाचार्याणां मतानुसारं यजमानः सोमप्रवाकं कृत्वा तेन अन्यान् ऋत्विजान् सोमार्थं निवेदयति।[38] तत्प्रकारश्चेत्थम्–यजमानाहम्- अस्मिन् अग्निष्टोमे सोमे सोमप्रवाकं त्वा वृणीमहे इति वृत्वा सोमप्रवाकः प्रतिवदति - वृतोऽस्मि करिष्यामीति। ततः सोमप्रवाकं मधुपर्का-दिभिरभ्यर्च्य अत्विज्यार्थं सोमप्रवाकसोमं मे भवत्विहिऋत्विग्भ्य इति सम्प्रवर्तयति। तत्र सोमप्रवाकेन केभ्येति पृष्टे सति यजमानः उत्तरयति -**यज्ञेश्वरशर्मादिभ्यः** इति। तत्र सोमप्रवाकं विहाय षोडश ऋत्विजः भवन्ति। ते च चतुर्षु गणेषु विभक्तास्मन्ति। प्रत्येकस्मिन् गणे चत्वारः ऋत्विजः। तस्य प्रकारः-

| **अध्वर्युगणः** | **ब्रह्मगणः** | **होतृगणः** | **उद्गातृगण** |
|---|---|---|---|
| 1-अध्वर्युः | ब्रह्मा | होता | उद्गाता |
| 2-प्रतिपस्थाता | ब्राह्मणच्छंसी | मैत्रावरुणः (प्रशास्ता) | प्रस्तौता |
| 3-नेष्टा | आग्नीध्रः | अच्छावाकः | प्रतिहर्ता |
| 4-उन्नेता | पोता | ग्रावस्तुत् | सुब्रह्मण्यः |

एतान् ऋत्विजान् विहाय सदस्य नामकः एकः ऋत्विग्भवतीति केचन सूत्रकाराः समामनन्ति। सोमप्रवाकः सोमस्य प्रथमेअहनि आर्त्विज्यार्थं प्रत्येकः मृत्विजः गृहमवाप्य तेभ्यः सोमं निवेदयेत्। सोमप्रवाकः निवेदयति इत्थं - विष्णुशर्मणस्सोमो भविष्यति। तत्र भवता आध्वर्यवं कर्तव्यम्। अत्र कर्तव्यम् इत्यादि यथालिङ्गम्। ते च पृच्छन्ति तत्र कः ऋत्विक्?केच याचकाः? क्वचित्कल्याणो दक्षिणाः इत्यादि सोमप्रवाकः तत्तत्पश्नान् समाधते। सोमप्रवाकमुखात् उत्तरं श्रुत्वा यदि आर्त्विज्यार्थमनुमन्यते तर्हि महन्ने वोचो भर्गो मे वोचो यशो वोचो इत्यादिभिर्जपति। यदि नानुमन्यते, तर्हि **नमः सोमाय राज्ञे** इति जपेत्।

तत्र यजमानःसर्वान् ऋत्विजान् वृणोति। तद्यथा अस्मिन् ज्योतिष्टोमेऽग्निष्टोमे सोमे अध्वर्यु त्वा वृणीमहे। अथाध्वर्युः वदति - वृतोऽस्मि करिष्यामीति। एवं होतारमुद्गातारं ब्राह्मणं च चतुरः प्रमुखान् ऋत्विजः सर्वान् वा वृणोति। एवमेव सर्वाः क्रियाः यथाविधि अनुष्ठेयाः।

चतसृष्वपि संहितासु सामसंहिता परमगौरवशालिनी वर्त्तते। अत उच्यते बृहद्देवतायां "**सामानि यो वेति स वेदतत्वम**" अनेन साम्नः महिमानं ज्ञातुं शक्यते। नन्दनन्दनः श्रीकृष्णः श्रीमद्भगवद्गीतायाम् आह -वेदानां सामवेदोऽस्मि। अस्य वेदस्योद्देश्यमस्ति यत् गानपूर्वकमुपासनम्।ऋग्वेदे वैदस्यास्य प्रशस्ता प्रशंसा मिलतिः।यो जोगार तमृचः कामयन्ते, यो जागार तमु सामानि यन्ति। ऋग्सामयोः प्रागाढमिदं पारस्परिकसम्बन्धंसूचयितुम् उभयोर्मध्ये दाम्पत्य-भावस्याऽपि कल्पना वर्तते मन्त्रेषु। पतिः सन्तानोत्पादनाय पत्न्या आह्वानं कुर्वन् कथयति - सामरूपोऽहं पतिरस्मि त्वञ्च ऋग्रूपापत्नी असि।अहमाकाशोऽस्मि त्वञ्च पृथिव्यसि। अतः आगच्छ। आवयोर्मिलित्वा प्रजानामुत्पादनं कुर्मः। **अतोऽहमस्मि सात्वम्,**

**सामाहमस्मि ऋग्त्वम्द्योरहं पृथिवीत्वम्। ताविह सम्भवाय प्रजानाजनयावहै** (बृ.उ.) साम शब्दस्य निर्वचनम् अस्यामुपनिषदि एवं प्राप्यते यत् - सा च अमश्चेति तत्साम्नः सामत्वम्, सा शब्दस्य अर्थो भवति ऋग् तथा अमशब्दस्य अर्थः भवति गान्धारादयः स्वराः। अतः सामशब्दस्य व्युत्पत्तिलभ्यर्थो भवति यत्ऋचा सह सम्बन्धस्वरप्रधानगायनम्। **तया सह सम्बन्धः अमो नामस्वरः यत्र वर्त्तते तत्साम** इति।

साम्नां यज्ञेषु क्वचित् प्रस्तोत्रे क्वचित् उद्गात्रे गानविधानमस्ति।क्वचिच्च प्रस्ताव-उद्गीथ-प्रतीहार-उपद्रव - निधनरूपैः पञ्चविभागं कृत्वा विभिन्नांशाय ऋत्विग्भि उचारणविधिरस्ति।

सोमो नाम लताविशेषः।तत्र दव्यं सोमरसः, तं कस्माच्चित्पुरुषात् क्रीत्वा ततो रसं निष्कास्य तेन होमः क्रियते। अतः एवास्य सोमयाग इति व्यवहारःलतासाधनोप्येयं यागो न साक्षाल्लतया क्रियते, किन्तु तामभिषुत्य ततो रसं निष्कास्य तेनैव यागः क्रियते। ततो निष्काशितोरसः पात्रविशेषेषु ग्रहाख्येषु तत्र तत विहिता देवता उदिश्य ग्रहीतव्यः। तत्र यां कांचन देवतामुद्दिश्य रसे गृहीते तां देवतां साममन्त्रेण स्तोतव्यां विदधाति श्रुतिः,**ग्रहं गृहीत्वा चमसंवोन्नीय स्तोत्रमुपाकुर्यात्** (तै.सं.–3.1.4)। तानि च स्तोत्राणि आज्यैः स्तुवते माहेन्द्रेण स्तुवीत इत्यादिभिःवाक्यैः सामवेदीयब्राह्मणगतैर्विहितानि। इमानि च गीतिविशिष्टैमन्त्रैरुद्गातृप्रतिहर्तृप्रस्तोतृसंज्ञकैस्त्रिभिर्ऋत्विग्भिः क्रियन्ते। एवं ग्रह ग्रहणानन्तारं तदीयायां देवतायां साममन्त्रैः सामवेदीयैः पूर्वोक्तैर्ऋत्विग्भिः स्तुतायां तामेव देवतां पुनर्ऋङ्मन्त्रेण होतृसंज्ञकेन ऋत्विजा स्तवनीयमभिदधाति वैदिकं वचनं स्तुतमनु शंसति इति

स्तोत्रविशेषः स्तोमः। सामसाध्यस्तुतिस्तोमः। त्रिवृत्-पञ्चदश-सप्तद-शैकविंश-त्रिणव-चत्वारिंश-चतुश्चत्वारिंशाष्टाचत्वारिंशशब्दैः साम्नः आवृतिभेदेन निस्पन्नाः स्तोमाः उच्यन्ते। यथा पूर्वम् उक्तम् **–ग्रहं वा गृहीत्वा चमसवोन्नीय स्तोत्रमुपाकरोति**। अर्थात् यस्यैदेवतायै ग्रहवचमसो वा गृह्यते तत् तद्देवतानां स्तोत्रं तद् ग्रहचमसग्रहणानन्तरमेव क्रियते उद्गात्रादिभि-त्रिभिर्ऋत्विग्भिः। यज्ञकाले तस्य साम्नः तिसृषु ऋक्षु गानं विहितम्। एकं साम यस्मिन् तृचे क्रियते तत् स्तोत्रीयमित्युच्यते। तत्र प्रथमा ऋग् योनिरित्युच्यते। उपरितने च द्वौ ऋचौ उत्तरे इत्युच्यते। यद्योन्यां तदुत्तरयोर्गायति इति। तत्रैव च गाने त्रिवृत्पञ्चदशादयः स्तोमाः विहिताः।

उच्चस्वरेण गायन्तीति उद्गातारः, प्रातःसवनेमन्दस्वरेण, माध्यन्दिने मध्यमस्वरेण, तृतीयसवने तारस्वरेण गेयमिति नियमो वर्तते।

तस्यैव सोमयागस्य अग्निष्टोमज्योतिष्टोमेतिनामान्तराणि भवन्तिः, अयं सोमयागः अग्निष्टोमसंस्थाकत्वादग्निष्टोम इत्युच्यते। अग्निष्टोम इति साम्नः संज्ञा। सामवेदे**यज्ञायज्ञा वो अग्नये**इत्यृचि गेयत्वेन विहितं साम अग्निष्टोम इत्युच्यते। संस्था शब्दश्च समाप्तवाची।एतददेवात्र क्रतावन्तिमं साम। न ततः सामान्तरमस्ति इति अनेनैव समाप्यमानत्वादयमेव क्रतुः अग्निष्टोमसंस्थाकोऽग्निष्टोम इत्युच्यते। सोमयागस्य येन साम्ना समाप्तिः तन्नाम्ना व्यवहारः। यथा उक्थ्य, षोडशी इत्यादि। इयं च अग्निष्टोमेति संज्ञा ज्योतिष्टोमस्य प्रथमा संज्ञा। ज्योतिष्टोमस्य अग्निष्टोम, उक्थ, षोडशी, अतिरात्रश्चेतिचतस्रः संस्थाः।

1.अग्निष्टोमसाम्नायज्ञायज्ञियाख्येनयज्ञसमाप्तिर्यत्र सोऽयमग्निष्टोमः। तत्रैवाग्निष्टोमे राज्यन्यस्य षोडशिनं गृह्नीयात् इति अग्निमारूतादूर्ध्वं षोडशीग्रहस्य स्तुतशस्त्रे यदा भवतः तदा सोऽत्यग्निष्टोम इत्युच्यते।

2.यत्र उक्थाख्यसाम्ना स्तूयते न ततः परमस्ति किंचित्सामस उक्थसंस्थाको ज्योतिष्टोमः। उत्थाप्यते सोमोऽनेनेत्युक्थ्यः। उक्थ्यनामकानि अग्निष्टोमीयेभ्यो द्वादश स्तोत्रेभ्यः उपरितनानि त्रीणि स्तोत्राणि यस्मिन्क्रतौ सः उक्थ्यः क्रतुः, तेन उक्थ्ये पञ्चदशस्तोत्राणि तावन्त्येव शस्त्राणि।

3.उक्थ्यस्तोत्रानन्तरं यत्र षोडयाख्यं स्तोत्रं क्रियते सःषोडशिसंस्थाको ज्योतिष्टोमः। षोडशशस्त्राणि अस्मिन्क्रतौ सः क्रतुः षोडशी। अयं न स्वतन्त्रः क्रतुः। ततः अग्निष्टोमादिवन्नायं पृथगनुष्ठातुं योग्यः। उक्थ्यस्तोत्रेभ्यः तद्गर्भितःषोडशीत्यस्य एकेन स्तोत्रेणातिरिच्यते।

4.षोडशिस्त्रोत्रानन्तरंयत्रअतिरात्रसंज्ञकानिसामानिगीयन्तेसोऽतिरात्र संस्थाकोज्योतिष्टोमः।

5.एवं सङ्ख्याचतुष्टयविशिष्टस्य क्रतोर्ज्योतिष्टोम इति संज्ञा। त्रिवृत्-पञ्चदश-सप्तदश-एकविंश इति चत्वारःस्तोमाः ज्योतिपदेनाभिधीयन्ते। ज्योतिंर्षिस्तोमाः यस्य सः ज्योतिष्टोमः।

अग्निष्टोमस्तोत्रानन्तरमुक्थ्यमकृत्वा यत्र षोडशी क्रियते, सोऽत्यग्निष्टोमसंज्ञकः क्रतुः।

एवमेव सप्तसंस्थाः स्मृतौ नित्यतया विहिताः, तत्र अग्निष्टोमसंस्थाके ज्योतिष्टोमे द्वादश स्तोत्राणि, द्वादश शस्त्राणि।

1.बहिस्यवमानस्तोत्रं प्रथमम्–अर्थात्, सामगानमुत्तराग्रन्थे तृचात्मकानि सूक्तान्याम्नातानि। तत्र **उपास्मै** इत्याद्यं सूक्तम्। **दवि द्युतत्या** इति द्वितीयम्। **पवमानस्य ते** इति तृतीयम्। ज्योतिष्टोमस्य प्रातःसवनानुष्ठाने तेषु त्रिषु सूक्तेषु गायत्रं सामगातव्यम्। तदिदं सूत्रत्रयागानसाध्यस्तोत्रं वहिष्पवमानमित्युच्यते। तत्र स्थितानामृचां पवमानार्थत्वात् बहिः सम्बन्धाच्च।

2.चत्वार्याज्यिनामकानि स्तोत्राणि द्वितीयम् - आ समन्ताज्ज-यन्त्येभिरित्याज्यानि। उत्तराग्रन्थे बहिष्पवमानसूक्तेभ्यस्त्रिभ्य ऊर्ध्वं यानि चत्वारि सूक्तान्याम्नातानि, तान्येव प्रातःसवने गायत्रसाम्ना गीयमानानि चत्वारि आज्यस्तोत्राणीत्युच्यन्ते।

3.चत्वारि पृष्ठनामकानि स्तोत्राणि तृतीयम्- बृहत्, रथन्तरम्, वैरूपम्, वैराजम्, शाक्कम्, रैवतम् इति षट् सामानि पृष्ठानीत्युच्यन्ते। पृष्ठानां समूहः पृष्ठ्यः। स्पृशति प्राप्नोति स्वर्गो लोकोऽनेन सामषट्केन इति पृष्ठ्यः।

4.एकं माध्यन्दिनपवमानाख्यं चतुर्थम्- उत्तराग्रन्ये आज्यस्तोत्रेभ्य ऊर्ध्वं यानि त्रीणि सूक्तानि, तान्येव माध्यन्दिने सवने

गायत्राऽऽमहीयव-रौरव-यौधाजनौशनसामभिर्गीयमानानि पञ्च माध्यन्दिनस्तोत्राणि। तत्र आम्नातेषु चतुर्षु सूक्तेषु रथन्तर-वामदेव्य-नौधस-कालेयसामभिः सम्पाद्यानि चत्वारि पृष्ठस्तोत्राणि माध्यन्दिनसवनीयान्येव।

5.एकमार्भवपवमानं पञ्चमम् - तृतीयसवने गेयानि गायत्र-संहित-शफ-पोष्कल-श्यावाश्व-गान्धीगवसामभिर्निष्पाद्यानि आर्भव-पवमानस्तोत्राणि ऋभुनामकैर्देवैदृष्टानि षट्।

6.एकमग्निष्टोमत्र षष्ठम् - येन साम्ना अग्निष्टोमसंस्था समाप्यते तदग्निष्टोमस्तोत्रम्।

एवं सामानि सामवेदे सर्वथा उपयुक्तानि भवन्ति। इतोऽपि सन्ति अनेकानि सामानि। यासां तत्र तत्र प्रक्रियायां पाठः विधीयते। अतः एवं वक्तुं शक्यते यत् सोमयागः साम्नां विहाय न पूर्णतां विन्देतेति। एवमेव पुराकाले यज्ञः एव अस्माकं जीवनधारणमाध्यमरासीत्। यज्ञेन एव सर्वविधकामाः प्राप्यन्ते स्म। अत इदानीम् अस्माकं जीवनमपि यज्ञेन परीपूर्णं भवति चेत् तर्हि जीवनं साफल्यं भवतीति निश्चप्रचम्।

**सन्दर्भग्रन्थसूची –**

1. वेदभाष्यभूमिका
2. पारस्करगृह्यसूत्रम्
3. कात्यायनश्रौतसत्रम्
4. गौतमधर्मसूत्रम्
5. तैत्तरीयसंहिता
6. मैत्रायणीसंहिता
7. काण्वसंहिता
8. याज्ञवल्क्यस्मृति
9. वैदिकवाङ्मयस्येतिहासः
10. मनुस्मृतिः
11. श्रीमद्भगवद्गीता।
12. बृहदारण्यकोपनिषद्।

**पाद टिप्पणी -**

[1] या.स्मृ. 3.5.219

[2] बृ.उ. 4.4.22

[3] मै.सं. 2.4.8

[4] तै.स. 2.4.6

[5] तै.सं. षष्ठ का. तृ.प्र.

[6] भ.गी.

[7] पा.गृ.सू.

[8] गौ.ध.सू.

[9] अमावस्यां पौर्णमास्यां वादधीत। शां श्रौ. –२.१.७.

[10] कृत्तिकासु रोहिण्याम्। आ. श्रौ. –२.१.१.

[11] का. श्रौ.–४.७.५

[12] तत्रैव– ४.७.६

[13] तत्रैव– ४.७.७

[14] तत्रैव– ४.१.३.३

[15] मनुस्मृति 3,68-70

[16] पा.गृ. सू.

[17] आप.श्रौ. धूर्तस्वामीभाष्यम् – पृ २-३

[18] आ.श्रौ. – २४.१.१

[19] का. श्रौ. - ७.१.१

[20] का. श्रौ. - ७.१.१

[21] सोमेन यक्ष्यमाणो नर्तु पृच्छेन्न नक्षत्रम् (आ.श्रौ- २.१.१)
यथाकाम्यमृतुनां सोमेन यक्षमाणस्य (शांश्रौ.२.१.६)

[22] यस्यवेदश्च वेदी च विच्छेद्यते त्रिपुरुषम्
स वै दूर्ब्राह्मणो नाम ब्रह्मविदिषु गर्हितः।

[23] का. श्रौ. - ७.१.६

[24] का. श्रौ. - ७.१.५

[25] का.श्रौ. - ७.१.१

[26] तै. ब्रा. - १.५.११

[27] य.क.- ७.पृ- ४३-४५

[28] भार. श्रौ. – १०.२.१३

[29] आप. श्रौ - १०.१.२.१७

[30] का.श्रौ - १०.१.२५
एष वा प्रथमो यज्ञानाम् (ता.ब्रा. १६.१.२)

[31] का. श्रौ. -१०.९.२६

[32] आ. श्रौ. - १४.१.१-२
अग्निषोमवत्तेषां कल्पः (आप.श्रौ. –१४.१.३)

[33] स. श्रौ. - ७.१.१

[34] द्रा. श्रौ. - २२.३.४

[35] का. श्रौ. - ७.११

[36] का. श्रौ. - ७.१.५

[37] स. श्रौ. - ७.१.१

[38] ला. श्रौ. -1.१.१२ आवसथः सोमप्रवाकाय लवणमन्त्रं दध्याहारयेत्